न्यासधृतमन्त्रे "ऋं नमो दक्षिणघ्राणे ॠं नमो वामघ्राणे"। इति। अनुबन्धविशेषः। यथा, कविकल्पद्रुमः। "उः क्त्वावेडस्तु वेट्क ऋः। षडा-ऋस्वः"। एतेन ढौकृङ् गत्यामित्यस्य लुङि अडुढौकदिति सिद्धम्॥)

ऋ, प्रापे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-अनिट्।) प्रापः प्राप्तिः। "ऋच्छति धनं धनी"। इति दुर्गादासः॥

ऋ, इर न गत्याम्। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्॥)

ऋ, र लि गत्याम्। (जुहों-परं-सकं-अनिट्।) र वैदिकः। लि इयर्त्ति। अपो लुङ्रयादस्य प्रच्छमानयोरेव ऋच्छादेशः। इयृच्छत् समियृच्छानः। इति दुर्गादासः॥

ऋ, र न हिंसने। इति कविकल्पद्रुमः। (स्वां-परं-सकं-अनिट्।) र वैदिकः। न ऋणोति। रेफादिस्तृतीयस्वरान्तोऽयमिति केचित्। इति दुर्गादासः॥

ऋ, अ गर्हणम्। वाक्यम्। देवमातरि स्त्री इति मेदिनी॥ (सम्बोधनम्।) परिहासः। वाक्यविकारः। इति शब्दरत्नावली॥ (पुं, स्वर्गः॥)

ऋक्, [च्] स्त्री, (ऋच्यन्ते स्तूयन्ते देवा अनया। ऋच्+क्विप्।) वेदविशेषः। ऋग्वेदः। इत्यमरः॥ अस्य एकविंशतिशाखाः। वेदमन्त्रविशेषः। तस्य लक्षणम्। यत्रार्थवशेन पादव्यवस्थितिः। अस्यार्थः। यत्रार्थवशेन एकान्वयित्वेनानुष्टुवादिपादस्थितिः। इति जैमिनिः॥ (ऋग्यजुःसामाथर्व्ववेदाभिहितैरपरैश्चाशीर्विधानैरुपाध्याया भिषजश्च सन्ध्ययोः रक्षां कुर्य्युः॥ इति सुश्रुते सूत्रस्थाने ऊनविंशेऽध्याये॥)

ऋक्थं, क्ली, (ऋच् स्तुतौ ऋच्+"पातृतुदिवचिरिचिसिचिभ्यस्थक्"।२।७। इत्युणादिसूत्रेण थक्।) धनम्। इत्यमरः॥ स्वर्णम्। इत्युणादिकोषः॥ (यदुक्तं शब्दार्णवे। "हिरण्यं द्रविणं द्युम्नं विक्तमृक्थं धनं वसु"॥) पुंस्त्वहीनस्य ऋक्थिनः"। इति याज्ञवल्क्यः। "ऋक्थमूलं हि कुटुम्बं"। इति दायभागे पितृधनविभागकालेऽभिहितम्॥)

ऋक्ष, न र वधे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) र वैदिकः। न ऋक्ष्णोति। इति दुर्गादासः॥

ऋक्षं, क्ली, पुं, (ऋष्+स। "अश्रिक्षितक्षिभ्यः कित्"। ३। ६६। इत्युणादिसूत्रेण कित्।) नक्षत्रम्। इति मेदिनी॥ (यथा, मनुः।२।१०१।
"पूर्व्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात्।
पश्चिमान्तु समासीनः सम्यगृक्षविभावनात्"॥
तच्च अश्विन्यादिभेदेन सप्तविंशतिः।) राशिः। इति ज्योतिषम्॥ (राशयश्च मेषवृषादिभेदेन द्वादश। अस्मिन्नर्थे प्रमाणं यथा रघौ।१२।२५।
"प्रययावातिथेयेषु वसन्नृषिकुलेषु सः।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः"॥
"ऋक्षेषु नक्षत्रेषु राशिषु वा भास्कर इव"।
इति तट्टीकायां मल्लिनाथः॥)

ऋक्षः, पुं, (ऋष्+सः।) पर्व्वतविशेषः। (अयं हि कुलाचलानामेकः। यथा, सिद्धान्तशिरोमणौ।
"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः"॥)
भल्लूकः। (यथा मनुः। १२। ६७।
"वृको मृगेभं व्याघ्रोऽश्वं फलमूलन्तु मर्कटः।
स्त्रीमृक्षस्तोककोवारि यानान्युष्ट्रः पशूनजः"॥)
श्योणाकवृक्षः। इति मेदिनी॥ श्योनाकप्रभेदः। इति राजनिर्घण्टः॥ (स्वनामख्यातोऽजमीढपुत्रः। यथा, हरिवंशे पुरुवंशानुकीर्त्तने। ३२। ८७।
"धूमिन्या स तया देव्या त्वजमीढः समेयिवान्।
ऋक्षं स जनयामास धूमवर्णं सुदर्शनम्"॥
स्वनामख्यातो विदूरथस्य पुत्रः।
यथा, तत्रैव ३२। १०४।
"विदूरथस्य दायद ऋक्ष एव महारथः"॥
तथा स्वनामख्यातोऽरिहस्य पुत्रः। यथा, महाभारते १। पुरुवंशानुकीर्त्तने। ९५। २४।
"अरिहः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजीजनदृक्षम्"॥ एतेन पुरुवंशे त्रयएव ऋक्षनामानो राजानः सम्भूताः॥)

ऋक्षगन्धा, स्त्री, (ऋक्षस्येव गन्धो यस्याः।) वृक्षविशेषः। वीरताड़ इति ख्यातः। तत्पर्य्यायः। छगलान्त्री २ आवेगी ३ वृद्धदारकः ४ जुङ्गः ५। इत्यमरः॥ ऋषिगाछल इति ख्यातो वृक्षश्च। तत्पर्य्यायः। ऋष्यगन्धा २ ऋषिगाङ्गलिका ३ इति रत्नमाला। क्षीरविदारीवृक्षः। तत्पर्य्यायः। महाश्वेता २। क्षीरिका ३। ऋक्षगन्धिका ४। इति शब्दरत्नावली॥ (वृद्धदारकशब्देऽस्याः गुणादयो ज्ञेयाः॥)

ऋक्षगन्धिका, स्त्री, (ऋक्षगन्धा+स्वार्थे कन्। अत इत्वम्।) क्षुद्रभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीरविदारी २ महाश्वेता ३। इत्यमरः॥

ऋक्षरं, क्ली, (ऋषी गतौ। ऋष्+"तन्यृषिभ्यां क्सरन्"।३।७५। इत्युणादिसूत्रेण क्सरन्।) वारिधारा। इति मेदिनी॥

ऋक्षरः, पुं, (ऋष+"तन्यृषिभ्यां क्सरन्"। ३। ७५। इत्युणादिसूत्रेण क्सरन्।) ऋत्विक्। इति मेदिनी॥

ऋक्षराजः, पुं, (ऋक्षाणां भल्लूकानां राजा। राजाहःसखिभ्यष्टच्।) जाम्बवान्। इति रामायणम्॥ (यथा, हरिवंशे। ३८। ४१।
"लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्"॥)

ऋक्षेशः, पुं, (ऋक्षाणां नक्षत्राणामीशः।) चन्द्रः। इति हलायुधः॥

ऋच, श नुत्याम्। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श ऋचति। अानर्च। इति दुर्गादासः॥

ऋचीषं, क्ली, (ऋचतीति। ऋच्+बाहुलकात् कीषन्।) पिष्टकभर्जनपात्रम्। इति हेमचन्द्रः॥

ऋच्छ, श मूर्त्तौ। गमने। मोहे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं अकञ्च-सेट्।) श ऋच्छती ऋच्छन्ती। मूर्त्तिः कठिनीभावः। "मूर्त्तिः काठिन्यकाययोरित्यमरात्। ऋच्छति घृतं कठिनं स्यादित्यर्थः। ऋच्छति वृद्धो गच्छति मुह्यति वेत्यर्थः। मोहस्थाने इन्द्रियप्रलयं पठन्ति प्राञ्चः। ऋच्छति वृद्धस्येन्द्रियं प्रलीयते इत्यर्थः। इति रमानाथः"॥ इति दुर्गादासः॥

ऋच्छरा, स्त्री, (ऋच्छति परपुरुषं प्राप्नोतीति। ऋच्छ+"ऋच्छेररः" ३।१३१। इत्युणादिसूत्रेण अरः। अरन् इति प्रमाद इति पारायणीयम्।) वेश्या। इत्युणादिकोषः॥ (यथा, अथर्व्ववेदे १०। ९२०। "ऋच्छरा ये च ते शफाः"॥)

ऋज, ङ गत्याम्। स्थैर्य्ये। ऊर्ज्जने। अर्ज्जने। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-अकञ्च-सेट्।) ङ अर्ज्जते। ऊर्ज्जनं जीवनं बलवद्भावश्च। इति दुर्गादासः॥

ऋज, इ ङ भृजि। इति कविकल्पद्रुमः॥ (इदित् भ्वादिं-आत्मं-सकं-सेट्।) ऋस्वादिः। भृजि भर्जने। इ ऋञ्जते। ङ ऋञ्जते मत्स्यं सूपकारः। इति दुर्गादासः॥

ऋजीषं, क्ली, (अर्जते रसोऽस्मादिति। ऋज्+"अर्जेर्ऋजश्च" इत्युणादिसूत्रेण ईषन्।) पिष्टपचनम्। पिष्टकभर्जनपात्रम्। इति हेमचन्द्रामरौ॥ नरकविशेषः। अत्र पिष्टपचनप्रक्षेपः।
(यथा, मनुः ४।९०।
"लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्"॥
धनम्। सोमलताया उद्धृतो रसः। यथा, ऋग्वेदे ३। ४३। ५। "कुविद्राजानं मघवन्नृजीषिन्"। "ऋजीषिन् सोमवन्"। इति भाष्यम्"॥)

ऋजु, त्रि, (अर्जयति गुणान्। अर्ज अर्जने। "अर्जिदृशीति"। १। २८। उणादिसूत्रेण साधुः।) अवक्रम्। सोजा इति भाषा। तत्पर्य्यायः। अजिह्मम् २ प्रगुणम् ३। इत्यमरः॥ प्राञ्जलः ४ सरलः ५। इति जटाधरः॥
("उमां स पश्यन् ऋजुनैव चक्षुषा"।
इति कुमारे ५। ३२॥ यथा, मनुः। २। ४७।
"ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः"॥
स्त्रियां ङीष्पक्षे यथा, माघे १२। १८।
"ऋज्वीर्दधानैरवतत्य कन्धरा-
श्चलावचूड़ाः कलघर्घरारवैः॥
अनुकूलम्। यथा, ऋग्वेदे ५। ४१। १५।
"ऋजुहस्त ऋजुवनिः"। "ऋजुहस्तः सरलहस्तः"। इति भाष्यम्॥ शोभनम्। यथा ऋग्वेदे ५। ४४। ५। "धारवाकेष्वृजुगाथः"। "ऋजुगाथः शोभनस्तुतिकः"। इति भाष्यम्॥ वसुदेवपुत्रभेदे पुं। यथा भागवते ९। २४। ५४।
"ऋजुं संमर्द्दनं भद्रं संकर्षणमहीश्वरम्"॥)

ऋजुकायः, पुं, (ऋजुः सरलः कायो यस्य।) काश्यपमुनिः। इति जटाधरः॥ अवक्रशरीरे त्रि॥
("तस्मिन् स्वस्तिसमासीन ऋजुकायः समभ्यसेत्"।
इति भागवते ३। २८। ८॥)

ऋज्रः, पुं, (ऋज्+"ऋज्रेन्द्राग्रवज्रेति"। २। २८॥ उणादिसूत्रेण निपातनात् रन् गुणाभावश्च।) नायकः। इत्युणादिकोषः॥ (सरलगामिनि, त्रि। यथा ऋग्वेदे १। ११७। १४। "युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः"।